इक्षाहारेण सन्तर्प्य द्विजश्चापि प्रजापतिम् ॥
होमेनानेन दानेन मुक्तो भवति कर्म्मतः ।
मादरं माधवं नत्वा सन्तर्प्य द्विजपुङ्गवान् ॥
स्नात्वा कलसतोयेन मुक्तो भवति मानुषः ॥"
इति भृगुभरतोक्तश्वासकासकर्म्मविपाकः ॥
अपि च ।
"पिशुनो नरकस्यान्ते जायते श्वासकासवान् ।
घृतं तेन प्रदातव्यं सहस्रपलसम्मितम् ॥"
इति शातातपीयकर्म्मविपाकः ॥

श्वासकासः, पुं, (श्वासयुक्तः कासः ।) श्वासयुक्तकासरोगः । श्वासजनककासः । यथा,—
"कासवृद्ध्या भवेच्छ्वासः पूर्व्वैर्वा दोषकोपनैः ।"
इति गारुड़े १५४ अध्यायः ॥
अन्यत् श्वासशब्दे द्रष्टव्यम् ॥

श्वासकुठारः, पुं, (श्वासस्य कुठार इव तन्नाशकत्वात् ।) श्वासरोगस्य औषधविशेषः । यथा,—
"रसो गन्धो विषञ्चापि टङ्कणञ्च मनःशिला ।
एतानि कर्षमात्राणि मरिचञ्चाष्टकर्षकम् ॥
कटुत्रयं कर्षयुग्मं पृथगत्र विनिःक्षिपेत् ।
रसः श्वासकुठारोऽयं सर्व्वश्वासनिवारणः ॥"
इति भावप्रकाशः ॥

श्वासप्रश्वासधारणं, क्ली, (श्वासप्रश्वासयोर्धारणं यत्र ।) प्राणायामः । इति हेमचन्द्रः ॥

श्वासहेतिः, स्त्री, (श्वासस्य हेतिरिव ।) निद्रा । इति हेमचन्द्रः ॥

श्वासारिः, पुं, (श्वासस्य अरिः ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥

श्वासी, [न्] पुं, (श्वासयतीति । श्वस + णिच् + णिनिः ।) वायुः । इति शब्दरत्नावली ॥ (श्वासोऽस्यास्तीति । इनिः ।) श्वासयुक्ते, त्रि ॥ (यथा, सुश्रुते । १ । २९ ।
"श्यामादारा रुदन्तश्च श्वासिनो विकृतेक्षणाः ।
याम्यां दिशं प्राञ्जलयो विषमैकपदे स्थिताः ।
वैद्यं य उपसर्पन्ति दूतास्ते चापि गर्हिताः ॥"
श्वासरोगयुक्ते च त्रि । यथा, तत्रैव । ६ । ५१ ।
"स्नेहवर्ज्जितं विना केचिदूर्द्ध्वाधश्च शोधनम् ।
कृद्धप्राणवतां केचिद् श्वासिनामादिशन्ति हि ॥"

श्वि, टु ए ओ इर् गतिवृद्ध्योः । इति कविकल्पद्रुमः ॥ भ्वा०-पर०-सक०-सेट् ।) तालव्यादिः । टु, श्वयथुः । ए, शूयात् । ओ, शूनः । इर्, अश्वत् अश्वयीत् । इति दुर्गादासः ॥

श्वित, ऌ भा ङ शौक्ल्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) वकारयुक्तः । ऌ, अश्वितत् । भा, श्वितितं श्वित्तम् । ङ, श्वेतते प्रासादः । इति दुर्गादासः ॥

श्वित्रं, क्ली, (श्वेतते इति । श्वित शौक्ल्ये + "स्फायितञ्चिवञ्चीति ।" उणा० २ । १३ । इति रक् ।) श्वेतकुष्ठम् । तत्पर्य्यायः । कुष्ठम् २ । इत्यमरः ॥ श्वेतम् ३ श्वेत्रम् । इति तट्टीका ॥ (यथा, भागवते । ७ । १ । १८ ।
"अपतोरक्षशहिष्णुं यद्ब्रह्म परमव्ययम् ।
श्वित्रं न जातं जिह्वायां नान्धं विविशतुस्तमः ॥")

अथ त्वग्दृष्टिसाम्यात् कुष्ठभेदत्वश्चैव श्वित्रमाह ।
"कुष्ठैकसम्भवं श्वित्रं किलासञ्चारुणं भवेत् ।
निर्द्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम् ॥"
कुष्ठैकसम्भवं कुष्ठेन सह एकस्तुल्यः सम्भवो निदानं यस्य तत् । श्वित्रस्य भेदानाह । किलासं चारुणं भवेत् । श्वित्रमेव रक्तसंश्रयात् किलासमरुणं भवेत् इत्यन्वयः । ननु कुष्ठस्य श्वित्रस्य को भेदः इत्यत आह । निर्द्दिष्टमपरिस्रावीति । श्वित्रमपरिस्रावि भवति कुष्ठन्तु स्रावि अथच त्रिधातूद्भवसंश्रयमिति त्रयो धातवो वातपित्तकफास्तेभ्यः पृथग्भूतेभ्य उद्भवो यस्य तत् । अथ च त्रयो धातवो रक्तमांसमेदांसि संश्रयोऽधिष्ठानं यस्य तत् । कुष्ठं सान्निपातिकं सर्व्वधातुगतञ्च भवति इति भेदः ॥ दोषभेदेन लक्षणभेदमाह ।
"वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत् ।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ॥
सकण्डूकं क्रमात् रक्तं मांसमेदः स चादिशेत् ।
वर्णेनैवेदमुभयं कष्टं तच्चोत्तरोत्तरम् ॥"
अरुणमीषल्लोहितम् । कमलपत्रवत् इत्यनेन मध्ये श्वेतमन्ते लोहितं बोधयति ।
"घनं पुष्टं क्रमाद्रक्तं मांसमेदःसु चादिशेत् ।"
तथा च चरकः ।
"अरुणं रक्तगे वाते ताम्रं पित्ते पलङ्गते ।
श्वेतं श्लेष्मणि मेदःस्थे श्वित्रं कुष्ठं परं परम् ॥"
इति ॥
उभयं द्विविधमपि श्वित्रं वर्णेन ईदृगेव । अरुणं ताम्रं श्वेतञ्च दोषभेदात् । द्विविधं दोषजं व्रणजञ्च । तथा च भोजः ।
"श्वित्रञ्च द्विविधं विद्याद्दोषजं व्रणजं तथेति ॥"
श्वित्रं साध्यमसाध्यमाह ।
"अशुक्लरोमावहलमसंसृष्टं मिथो नवम् ।
अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा ॥"
अवहलं तनु । अन्यच्च ।
"गुह्यपाणितलोष्ठेषु जातमप्यचिरन्तनम् ।
वर्ज्जनीयं विशेषेण किलासं सिद्धिमिच्छता ॥"
गुह्यं मेहनं भगञ्च । तलमत्र पादतलम् । सुश्रुतेनास्ये जातमिति सामान्यतो निर्द्दिष्टत्वात् ॥*॥ अथ श्वित्रस्य चिकित्सा ।
"विभीतकत्वङ् मलपूजटानां
क्वाथेन कृत्वा गुड़संयुतेन ।
अवल्गुजं बीजमपावरोति
श्वित्राणि कृच्छ्राण्यपि पुण्डरीकम् ॥"
मलपूः कटुवरी । अवल्गुजः वाकुची ॥ १ ॥
"कुड़वावल्गुजबीज हरितालं तच्चतुर्थांशम् ।
मनःशिला तालकार्णी गुञ्जाफलमग्निमूलञ्च ॥
मूत्रेण गवां पिष्टं सवर्णताकारकं श्वित्रस्य ।" २ ।
"श्वित्रकुष्ठं प्रजल्पन्तं प्रच्छर्दिताधिकेन वा ।
गिरिकर्ण्याः सिताख्य मूलेन परिलेपितम् ॥"
गिरिकर्णी नीलापराजिता । धन्वन्तरीति लोके ॥ ३ ॥
"क्वाथः सवाकुचीचूर्णं धात्रीखदिरसारयोः ।
शङ्खेन्दुकुन्दधवलं श्वित्रं संसेवितो हन्ति ॥४॥
मथितेन पिबेच्चूर्णं काकोदुम्बरवल्गुजम् ।
तैलाक्तं घर्म्मसेवी स्यात्तक्राशी श्वित्रवद्भवेत् ॥"
मथितं निर्जलं विलोड़ितं दधि । तक्रं चतुर्थांशजलयुक्तं वस्त्रपुतं दधि ॥५॥
"खदिरस्य पलान्यष्टौ सोमराज्याः पलद्वयम् ।
त्रिफला पिचुमर्द्दश्च दारुदार्व्वीश्च पर्पटः ॥
पृथक् फलान् समुद्धृत्य सिंहिकायाः पलद्वयम्
जलाढ़कद्वये साध्यं यावत् पादावशेषितम् ॥
क्वाथ्यमानश्च मृद्वग्नौ घृतप्रस्थं विपाचयेत् ।
चतुःपलं सोमराज्याः खदिरस्य पलं तथा ॥
पटोलमूलत्रिफलात्रायमाणा दुरालभा ।
कषाद्वं कटुकञ्चापि कार्षिकान् सूक्ष्मपेषितान् ॥
पलद्वयं कौषिकस्य शुद्धस्याश्च प्रदापयेत् ।
सिद्धं सर्पिरिदं श्वित्रं हन्यादश्च इतानलम् ॥
अष्टादशानां कुष्ठानां परमं वै तदौषधम् ।
सोमराजीघृतं नाम निर्म्मितं ब्रह्मणा पुरा ॥
लोकानामुपकाराय श्वित्रकुष्ठादिरोगिणाम् ॥"
इति सोमराजीघृतम् ॥६॥
"महौषधं महामेदां निम्बपत्राणि सर्षपाः ।
मनःशिला च सिन्दूरं पद्मवारिश्चवल्गुजम् ॥
हरिद्रे हरितालञ्च त्रिफला पीतगन्धकान् ।
एतानि समभागानि विषार्द्धांशानि योजयेत् ॥
सर्पिषश्च पलान्यष्टौ देवदारुरसं शुभम् ।
त्रिगुणं त्रिगुणं क्षीरं गोमूत्रञ्च चतुर्गुणम् ॥
ताम्रपात्रे तु संस्थाप्य शनैर्मृद्वग्निना पचेत् ।
चतुर्भागावशेषन्तु सकल्कमवतारयेत् ॥
अग्नौ क्षिपन्तु निःशब्दं जलमुक्तं विचक्षणः ।
अभ्यङ्गपानयोगात्तदाशु सर्व्वान् गदान् जयेत्
अष्टादशानां कुष्ठानां दद्रूणां श्वित्रिणां तथा
दुष्टनाड़ीषु मर्त्यानां स्राविणां कौटिनां तथा ।
असृक्स्रावपरीता ये ये च त्यक्तभिषक्क्रियाः
सर्व्वग्रहवियुक्तानां शीर्णाङ्गानां विशेषतः ॥
सर्व्वधातुगते कुष्ठे पतितभ्रूशिरोरुहम् ।
घर्घराव्यक्तघोषाणां तथा सर्व्वाङ्गवातिनाम् ॥
पानेऽभ्यङ्गे तथा नस्ये वस्तिकर्म्मणि नित्यशः ।
सप्तरात्रप्रयोगेण सर्व्वकुष्ठानि नाशयेत् ॥
द्विसप्ताहप्रयोगेण पूर्णचन्द्रनिभाननः ।
जातकेशनखश्मश्रुर्भाति षोड़शवर्षवत् ॥
कलङ्करहितं साक्षात् सर्व्वामयविनाशनः ।
एतद्घृतं महाश्रेष्ठं भार्गवेणावतारितम् ॥
मनुष्याणां हितार्थाय सर्व्वव्याधिहरं परम् ।
महामार्त्तण्डकामिदं घृतं सर्व्वामरार्च्चितम् ॥७॥
इति भावप्रकाशः ॥
अपि च ।
"धात्रीखदिरयोः क्वाथं पीत्वा च अम्बुसंयुतम्
शङ्खेन्दुधवलश्वित्रं हन्ति तूर्णं न संशयः ॥"
इति गारुड़े १७५ अध्यायः ॥

श्वित्रघ्नी, स्त्री, (श्वित्रं हन्तीति । हन + टक् । ङीष् ।) पीतपर्णी । इति शब्दचन्द्रिका ॥ विकुटी इति भाषा ॥